International Journal of Sanskrit Research 2024; 10(3): 159-164

International Journal of Sanskrit Research

अनन्ता

**ISSN: 2394-7519**
IJSR 2024; 10(3): 159-164
© 2024 IJSR
www.anantaajournal.com
Received: 27-03-2024
Accepted: 02-05-2024

**Balabhadra Karna**
Ph.D Scholar, School of Sanskrit, Gangadhar Meher University, Amruta Vihar, Sambalpur, Odisha, India

**Corresponding Author:**
**Balabhadra Karna**
Ph.D Scholar, School of Sanskrit, Gangadhar Meher University, Amruta Vihar, Sambalpur, Odisha, India

# पाणिनीयशौनकशिक्षाग्रन्थयोः स्वरविमर्शः

**Balabhadra Karna**

**DOI:** https://dx.doi.org/10.22271/23947519.2024.v10.i3c.2382

**सारांश**

महर्षिपाणिनिः भवति पाणिनीयशिक्षाग्रन्थस्य कर्त्ता । आचार्यशौनकः भवति शौनकशिक्षाग्रन्थस्य कर्त्ता । उभयशिक्षाग्रन्थः भवति ऋग्वेदीयशिक्षाग्रन्थः, उभयशिक्षाग्रन्थः कारिकात्मकः भवति । उभयशिक्षाग्रन्थः चाऽपि अनुष्टुप् छन्दसा विरचितं भवति । पाणिनीयशिक्षाग्रन्थे षष्टिसंख्याकाः(६०) कारिकाः वर्ण्यन्ते, शौनकशिक्षाग्रन्थे च सप्तषष्टिसंख्याकाः (६७) कारिकाः वर्ण्यन्ते । उभयशिक्षाग्रन्थौ वर्ण-स्वर-मात्रा-वल-साम-सन्तानश्च षट् तत्वानां विषये कीदृशं साम्यवैषम्यम् अस्ति, तस्मिन् विषये शोधपत्रेऽस्मिन् मया विस्तारतया उपस्थाप्यते ।

**कूटशब्द:** पाणिनः, शौनकः, शिक्षा, वर्णः, स्वरः, मात्रा, वलं, सामः, सन्तानः, स्वरवर्णः, ह्रस्वः, दीर्घः, प्लुतः, व्यञ्जनवर्णः, स्पर्शवर्णः, अन्तःस्थवर्णः, उष्मवर्णः, जिह्वामूलीयः, उपध्मानीयः, अनुस्वारः, विसर्गः, प्रणवश्च

**प्रस्तावना**

वैदिकसाहित्ये वेदाङ्गस्य स्थानम् अनस्वीकार्यं, वेदार्थवोधने अस्य आवश्यकता चाऽपि अत्यावश्यकमस्ति । वैदिकसाहित्ये वेदपुरुषस्य षट् अङ्गानि सन्ति । तानि वेदाङ्गानि भवन्ति- शिक्षा, छन्दः, कल्प, निरुक्तम्, ज्योतिषम्, व्याकरणञ्च । शिक्षा भवति वेदपुरुषस्य नासिका 'शिक्षा घ्राणं तु वेदस्य'[i] स्वरवर्णाद्युच्चारो यत्र शिक्ष्यते उपदिश्यते सा शिक्षा । अर्थात् यत्र अकारककारादिवर्णानां, उदात्तादिस्वराणां, ह्रस्वदीर्घादि मात्राणां, स्थानप्रयत्नादिवलादीनां वर्णनं विद्यते सा शिक्षा इति कथ्यते। वैदिकमन्त्राणां सम्यक् उच्चारणार्थं अर्थज्ञानार्थञ्च शिक्षाशास्त्राणां ज्ञानं परममावश्यकमिति अनुभूयते । अतः दिव्यद्रष्टाऋषिभिः वहवः शिक्षाग्रन्थाः प्रणीताः । तेषु शिक्षाग्रन्थेषु पाणनीयशिक्षा शौनकशिक्षा च अन्यतमा । अस्मिन् शोधप्रवन्धे पाणिनिकृत पाणिनीयशिक्षायां तथा शौनककृत शौनकशिक्षायाञ्च कीदृशं स्वरविवेचनं क्रियते-एतस्योपरि किञ्चदालोकपातं कर्तुं विचार्यते । वैदिकवाङ्मये स्वरस्य महत्वमनस्वीकार्यम् । स्वरस्याधारेण वेदः विदुषां मनसि श्रेष्ठत्वमावहति ।

समग्रविश्वे विद्वांसः वैदिकमन्त्राणामुच्चारणेन अभिभूताः भवन्ति । वेदस्य सम्यगुच्चारणं स्वरेण एव सम्भवति । एते स्वराः वेदानां सार्थकतां प्रतिपादयन्ति । याज्ञवल्क्यशिक्षायामुक्तमस्ति यत् – उदात्तादिस्वराणां सम्यगुच्चारणेन जनः ऋग्यजुसामभिः पवित्रं भूत्वा ब्रह्मलोकं प्राप्नोति । तथा हि-

स्वरवर्णान् प्रयुञ्जानो हस्तेनाधीतमाचरन् ।
ऋग्यजुःसामभिः पूतो ब्रह्मलोकम् अवाप्नुयात् ।।[ii]

वेदस्यार्थज्ञानाय स्वरज्ञानम् आवश्यकमिति जैमिनीयमीमांसासूत्रस्य भाष्ये शवरेण कथ्यते यत्-

अथ त्रैस्वरादीनां कथं समाम्नानमिति ?
अर्थाऽववोधनार्थं भविष्यति ।।[iii]

अर्थात् स्वरः वेदस्य विशेषार्थं वोधयति, येन अभीष्टसिद्धिर्भवति । मन्त्रोच्चारणे स्वराः यदि यथावदनुच्चार्य विपरीतं उच्चार्यन्ते, तर्हि यज्ञकर्म निष्फलं भवति । विषयेऽस्मिन् वाजसनीयप्रातिशाख्ये उवटेनोक्तम्-

मन्त्रस्तु यदि मनागपि स्वरतो वर्णतो वा हीनो भवति, अथ कर्मासमृद्धिः ।
न केवलं कर्मासमृद्धिः, किन्तर्हि ? दुष्टिहेतुः प्रत्यवायः स्यात्..।।[iv]

वेदः शव्दोऽयं आद्युदात्तः भवेच्चेत्, वेदशब्दस्य अर्थः श्रुतिः भवति। परन्तु यदा वेदशव्दः अन्तोदात्तः भवति, तदा वेदशव्दः दर्शपूर्णमासयागेषु प्रयुक्तं कुशमुष्टिं बोधयति । अतः वैदिकमन्त्रोच्चारणस्य शुद्धतामत्यावश्यकं भवति । विषयेऽस्मिन् पाणिनीयशिक्षायामपि वर्णनं क्रियते ।[v] ऋग्वेदभाष्यकारेण आचार्यवेङ्कटमाधवेन वर्ण्यते यत्, यथा अन्धकारे जनः दीपशिखायां गच्छति चेत् न पतति, तथैव स्वराणामाधारेण कश्चित् यदि वेदस्य मन्त्रार्थं जानाति, तर्हि तस्य अधोपतनं न भवति मन्त्राणां सम्यगर्थज्ञानकारणात् । तथा हि-

अन्धकारे दीपिकाभिर्गच्छन्न स्खलति क्वचित् ।
एवं स्वरैः प्रणीतानां भवन्त्यर्था स्फुरा इति ।।[vi]

**१.१ स्वरशव्दस्य परिचयः**

गत्यर्थकः √स्वर् धातुतः अच् प्रत्ययेन स्वरशब्दस्य निष्पत्तिर्भवति। यस्य अर्थो भवति- स्वर्यन्ते अर्थाः एभिः इति स्वराः । निघण्ठुग्रन्थे प्रयुक्तो स्वरितपदं गत्यर्थे प्रयुक्तं भवति । अतः स्वरस्य एवम्भूता व्युत्पत्तिः ग्रहणयोग्या ।[vii] स्वरशव्दस्य प्रयोगः शिक्षाशास्त्रेषु प्रामुख्येन द्वयोः अर्थयोः भवति । प्रथमतः स्वरः नाम स्वरवर्णाः अ आ इ ई उ ऊ ऋ ऌ ए ओ ऐ औ चेति । द्वितीयतः स्वरः नाम उदात्त-अनुदात्त-स्वरिताख्याः वर्णधर्माः । एतान् उदात्त-अनुदात्त-स्वरितान् अतिरिच्य वर्णोच्चारणे तान- स्वरस्य अपि प्रयोगः भवति । यत्तु शव्दकल्पद्रुमेऽपि स्वीक्रियते।[viii] वैदिकवाङ्मये स्वरशव्दः बहुषु अर्थेषु प्रयुज्यते इति युधिष्ठिरमीमांसकः स्वग्रन्थे उद्धरति ।[ix] यथा-

1. प्राणः- प्राणः स्वरः । प्राणो वै स्वरः ।[x] स्वरो नासा समीरिते स्यात् ।[xi]
2. सूर्यः- एष ह वै सूर्यो भूत्वाऽमूष्मिन् लोके स्वरिति । तद्वत् स्वरति तस्मात् स्वरः ।[xii]
3. सोमः- यदाह स्वरोऽसीति सोमं वा एतदाह ।[xiii]
4. प्रजापतिः- प्रजापतिः स्वरः ।[xiv]

स्वरशव्दस्य अनेकाः स्वरशब्दस्य पर्यायवाचकशब्दाः सन्ति । प्राचीनग्रन्थेषु स्वारः, यमः, गेह्मः, जातिश्चेति स्वरस्य पर्यायवाकशब्दाः भवन्ति । यथा-स्वारः – ब्राह्मणे तूदात्तानुदात्तौ भाषिकस्वारौ ।[xv] यमः – तौत्तिरीयप्रातिशाख्ये यमशब्दस्य प्रयोगः स्वरस्य पर्यायत्वेनापि क्रियते ।

**१.२ पाणिनीयशिक्षानुसारं स्वराणां विवेचनम्**

पाणिनीयशिक्षायां त्रयाणां स्वराणां विषये चर्चा क्रियते । एतेषां स्वराणामाधारेण स्वरवर्णानां विभाजनं दृश्यते । ग्रन्थेऽस्मिन् उदात्तादिस्वराः अच्-वर्णानां भेदाः भवन्तीति वर्णितमस्ति । उक्तञ्च पाणिनिना-

उदात्तश्चानुदात्तश्च स्वरितश्च स्वरास्त्रयः ।
ह्रस्वो दीर्घः प्लुत इति कालतो नियमा अचि ।।[xvi]

अर्थात्, स्वरवर्णाः उच्चारणकालदृष्ट्या ह्रस्व-दीर्घ-प्लुतभेदेन त्रिविधाः। पुनश्च स्वरदृष्ट्या एते त्रिविधाः

स्वरवर्णाः उदात्त-अनुदात्त-स्वरितभेदेन नवविधाः भवन्ति ।

### १.२.१ उदात्तस्वरः

पाणिनीयशिक्षायां वर्णितेषु त्रिविधेषु स्वरेषु उदात्तस्वरः भवति सर्वप्रथमस्वरः । अयं स्वरः ताल्वादिषु सभागेषु उर्द्ध्वभागे उच्चार्यते।[xvii] एतस्य उदात्तस्वरस्योच्चारणे शरीरावयवानाम् अशिथिलतां कण्ठविवरस्य संकोचनं स्वरस्य कर्कशतां च भवति इति पतञ्जलिना उक्तम् । तथा हि- यस्मिन्नुच्चार्यमाणे गात्राणामायो निग्रहो भवति, रूक्षता अस्निग्धता स्वरस्य, संवृतता कण्ठविवरस्य। [xviii] अस्माद् उदात्तस्वरतः हि सङ्गीतशास्त्रे प्रसिद्धयोः निषाद-गान्धारस्वरयोः आविर्भावः भवति ।

### १.२.२ अनुदात्तस्वरः

पाणिनीयशिक्षायां वर्णितेषु त्रिविधेषु स्वरेषु अनुदात्तस्वरः भवति द्वितीयस्वरः । स्वरोऽयं ताल्वादिषु सभागेषु निम्नभागे एव उच्चार्यते।[xix] अनेन स्वरेण शरीराऽवयवानां शीथिलता कण्ठविवरस्य महत्ता स्वरस्य मृदुलता च भवति । तथा चोक्तं महाभाष्ये- यस्मिन्नुच्चार्यमाणे गात्राणामन्ववसर्गो मार्दवं भवति, स्वरस्य मृदुता स्निग्धता, कण्ठविवरस्य उरुता महत्ता ।[xx] अनुदात्तस्वरतः सङ्गीतशास्त्रे प्रसिद्धयोः ऋषभ-धैवतस्वरयोः निष्पत्तिर्भवति । वेदे एतस्य अनुदात्तस्वरस्य ज्ञानार्थं स्वरस्य अधोदेशे सरलरेखा दीयते । यथा-

अ॒ग्निर्होता क॒विक्रतुः स॒त्यश्चि॒त्रश्रवसस्तमः ।
दे॒वो दे॒वेभि॒रागमत् ।।[xxi]

### १.२.३ स्वरितस्वर

स्वरितस्वरः भवति पाणिनीयशिक्षायां वर्णितेषु त्रिविधेषु स्वरेषु तृतीयस्वरः । स्वरोऽयम् उदात्तानुदात्तयोः स्वरयोः मिश्रणरूपमेव। एतस्मात् स्वरितस्वरात् सङ्गीतशास्त्रे प्रसिद्धाः षडजः मध्यमः पञ्चमश्चेति त्रयः स्वराः निष्पद्यन्ते । वेदे एतस्य स्वरितस्वरस्य ज्ञानार्थं स्वरस्योपरि दण्डायमानरेखा दीयते । यथा-

अग्निमीले पुरोहितं यज्ञस्य देवमृत्विजम् ।
होतारं रत्नधातमम् ।।[xxii]

एतेषु स्वरेषु सङ्गीतशास्त्रे सुप्रसिद्धाः सप्तस्वराः अन्तर्निहिताः भवन्तीति स्पष्टरुपेण ज्ञायते । अर्थात् उदात्तस्वरतः निषादः गान्धारश्च, अनुदात्तस्वरतः ऋषभः धैवतश्च, स्वरितस्वरतः षडज-मध्यम-पञ्चमाः चेति स्वराः निष्पद्यन्ते । तथा चोक्तम्-

उदात्ते निषादगान्धारावनुदात्तः ऋषभधैवतौ ।
स्वरितप्रभवाह्येते षडजमध्यमपञ्चमाः ।।[xxiii]

पाणिनीयशिक्षाग्रन्थे स्वरितकम्पस्वरस्यापि वर्णनमपि दृश्यते । तथा हि-

मध्ये तु कम्पयेत्कम्पमुभौ पार्श्वौ समौ भवेत् ।
सरङ्गं कम्पयेत्कम्पं रथीवेति निदर्शनम् ।।[xxiv]

अर्थात्, कम्पं तु मध्ये कम्पयेत्, उभौ पार्श्वौ समौ भवेत्, कम्पं सरङ्गं कम्पयेत् । कम्पस्वरस्य उच्चारणकाले स्वरस्य मध्यभागं कम्पितं कृत्वा उच्चारयेत्, मध्यभागस्य पूर्व-उत्तरभागौ समरूपेण (उदात्तस्वरौ अथवा अनुदात्तस्वरौ) उच्चारयेयुः । यदि कम्पस्वरे रङ्गवर्णः स्यात्, तर्हि रङ्गवर्णेन सह कम्पस्वरितस्वरस्य कम्पनं करणीयम् । उदाहरणं यथा-

रथीव कशयाश्वाँ अभिक्षिपन्नाविर्दूतान्कृणुते वर्ष्याँ३अह ।
दूरात्सिंहस्य स्तनथा उदीरतेयत्पर्जन्यः कृणुते वर्ष्यं१नभः।।[xxv]

उपर्युक्तमन्त्रे वर्ष्याँ३अह इति पदम् कम्पस्वरितस्वरस्य उदाहरणं भवति ।

पुनश्च स्वराणां स्थानप्रसङ्गेऽपि ग्रन्थेऽस्मिन् उच्यते यत्- उदात्तस्वरस्य स्थानं भवति मूर्धाप्रदेशः अनुदात्तस्वरस्य स्थानं भवति हृदयम्, स्वरितस्वरस्य स्थानं भवति कर्णमूलीयः, सम्पूर्णमुखप्रदेशश्च भवति प्रचयस्वरस्य स्थानम् । अतः मन्त्रेषु स्थितानां स्वराणामुच्चारणकाले तत्तत्स्वराणां स्थाने

हस्तसंस्थाप्य मन्त्रमुच्चारयेदिति ग्रन्थकारेण ज्ञापितम् ।[xxvi]

यद्यपि पाणिनीयशिक्षायां मुख्यरुपेण उदात्तः अनुदात्तः स्वरितश्चेति त्रयः स्वराः वर्ण्यन्ते । तथापि अत्र प्रचयस्वरस्य वर्णनं दृश्यते ।

### १.२.४ संहितोपयोगी पदशय्या

स्वरवर्णानाम् अवस्थितिः विषये पदानि नवप्रकारकाः भवन्ति । अर्थात् नवपदशय्याः भवन्ति । ते यथा- अन्तोदात्तपदम् आद्युदात्तपदम् उदात्तस्वरमात्रयुतपदम् अनुदात्तस्वरमात्रयुतपदं नीचस्वरितञ्च क्रमेण अनुदात्तेन स्वरितेन च स्वरेणयुतं पदं मध्ये उदात्तेन स्वरेणयुतं पदं स्वरितस्वरमात्रयुतं पदं द्वाभ्यामुदात्ताभ्यां युतं पदं त्रिभिरुदात्तैरयुतं पदम् इति नव प्रकारकाः पदविशेषरुपाः स्वरावस्तितिः स्थानविशेषाः नवपदशय्याः वा । एतस्योदाहरणमपि ग्रन्थेऽस्मिन् प्रदीयते । यथा-

> अग्निः सोमः प्र वो वीर्यं हविषां स्वबृहस्पतिरिन्द्राबृहस्पती ।
> अग्निरित्यन्तोदात्तं सोम इत्याद्युदात्तं प्रेत्युदात्तं व इत्यनुदात्तं वीर्यं नीचस्वरितम् ।।
> हविषां मध्योदात्तं स्वरिति स्वरितम् ।
> बृहस्पतिरिति द्युदात्तमिन्द्राबृहस्पती इति त्र्युदात्तम् ।।[xxvii]

### १.३ शौनकशिक्षानुसारं स्वराणां विवेचनम्

शौनकशिक्षानुसारं स्वराः उदात्तानुदात्तस्वरितप्रचयभेदेन चतुर्विधाः भवन्ति ।

#### १.३.१ उदात्तस्वरः

शौनकशिक्षायाम् उदात्तस्वरस्य लक्षणविषये उच्यते—

> नीचैस्वरोऽनुदात्तस्स्यादुच्चैश्चोदात्त उच्यते ।
> स्वरितस्तत्समाहारस्तदैक्यं प्रचयः स्मृतः ।।[xxviii]

अर्थात् यः स्वरः मुखगह्वरस्य ताल्वादिस्थानेष्वर्ध्वभागे उच्चैः उच्चार्यते, सः स्वरः उदात्तः इति कथ्यते । स्वरोऽयं मूर्धाप्रदेशे हस्तं स्थापयित्वा उच्चार्यते । अनेन स्वरेण स्वरस्य कर्कशतां भवति।

#### १.३.२ अनुदात्तस्वरः

शौनकशिक्षानुसारं यः स्वरः मुखगह्वरस्य ताल्वादिस्थानेषु निम्नभागे नीच्चैः उच्चार्यते, सः स्वरः अनुदात्तस्वरः भवति ।[xxix] अनेन स्वरेण स्वरस्य मृदुलतां प्रतीयते । अपिच स्वरोऽयं हृदिप्रदेशे हस्तं स्थापयित्वा उच्चार्यते ।

#### १.३.३ स्वरितस्वरः

शौनकशिक्षानुसारम् उदात्तानुदात्तयोः स्वरयोः समाहारः एव स्वरितस्वरः भवति ।[xxx]

स्वरितस्वरस्योच्चारणकाले हस्तं कर्णमूले स्थापयित्वा उच्चारयेत् । तथा हि-

> अनुदात्तः हृदि ज्ञेयो मूर्ध्नुदात्त उदाहृतः ।
> स्वरितः कर्णमूलीयस्सर्वस्मिन् प्रचयः स्मृतः ।।[xxxi]

शौनकशिक्षाग्रन्थे स्वरितकम्पस्वरस्यापि वर्णनं दृश्यते । तथा हि-

> मध्ये तु कम्पयेत् कम्पमुभौ नीचौ समौ भवेत् ।
> द्विगुणं वर्णकालाच्च पादः कम्पार्थमिष्यते ।
> अनुदात्तमुदात्ताय स्वरितं ह्यवलम्वयेत् ।
> पुनर्निहतमागच्छेदेष कम्पविधिः स्मृतः ।।[xxxii]

अर्थात्, यदा स्वरितस्वरस्य उभयोः पूर्वभाग-उत्तरभागयोः समानरुपेण अनुदात्तौ इव उच्चार्येते मध्यभागे च कम्पनं जायते, तदा सः स्वरः कम्पस्वरः इति ज्ञायते । कम्पस्वरस्य मध्ये कम्पनं भवति, परन्तु स्वरस्यादि अन्ते च साम्यं भवति ।

स्वरमध्ये यदा कम्पस्वरस्य पूर्वभागः उदात्तः उत्तरभागश्च अनुदात्तः भवति, सः उदात्तकम्पः इत्युच्यते । स्वरोऽयं ऋग्वेदे दृश्यते । उक्तञ्च शौनकेन-

> उदात्तः पूर्वभागस्तु परभागो निहन्यते ।
> उदात्तकम्पः इत्युक्तः कुत्रचिच्चापि दृश्यते ।।[xxxiii]

#### १.३.४ प्रचयस्वरः

शौनकशिक्षाग्रन्थे उदात्तानुदात्तयोः स्वरयोः ऐक्यभावः एव प्रचयस्वर इति वर्णितम् ।[xxxiv] सम्पूर्णमुखप्रदेशे हस्तं स्थापयित्वा एतस्य प्रचयस्वरस्य उच्चारणं विधीयते ।

### १.४ पाणिनीयशौनकशिक्षाग्रन्थयोः स्वराणां साम्यं वैषम्यञ्च

पाणिनीयशौनकशिक्षाग्रन्थयोः स्वरविषये यानि साम्यानि वेषम्यानि वर्त्तेते, तानि अधः क्रमेण उपस्थाप्यन्ते-

1. पाणिनीयशिक्षानुसारं स्वराः त्रिविधाः -उदात्तः अनुदात्तः स्वरितश्चेति । परन्तु शौनकशिक्षानुसारं स्वराः चतुर्विधाः - उदात्तः अनुदात्तः स्वरितः प्रचयश्चेति । पाणिनीयशिक्षायां प्रचयस्वरस्य उल्लेखेऽपि मुख्यरुपेण उदात्तः अनुदात्तः स्वरितश्चेति त्रयः स्वराः गृह्यन्ते । अस्य कारणं तु भवति यत् यदा स्वरितस्वरात् परम् अनुदात्तस्वरः आगच्छति, तदा तस्य अनुदात्तस्वरस्य उदात्तश्रुतिः भवति । तदेव स्वरितात् परः अनुदात्तस्वरः हि प्रचयस्वरः भवति, नान्यः । अतः प्रचयस्वरः चतुर्थस्वररूपेण पाणिनीयशिक्षायां न गृह्यते । परन्तु शौनकशिक्षायां चतुर्थस्वररूपेण प्रचयस्वरस्य उल्लेखोऽस्ति । अतः उदात्तः अनुदात्तः स्वरितः प्रचयश्चेति स्वराः ग्रहणीयाः ।
2. पाणिनीयशिक्षायां संङ्गीतशास्त्रे सुप्रसिद्धानां सप्तस्वराणाम् उत्पत्तिः उदात्त-अनुदात्त-स्वरितस्वरेभ्यः भवतीति वर्णितमस्ति । अर्थात् उदात्तस्वरतः निषादगान्धारयोः अनुदात्तस्वरतः ऋषभ-धैवतयोः, स्वरितस्वरतः षडज-मध्यम-पञ्चमस्वराणामुत्पत्तिः भवति । एतेषां सप्तस्वराणां विषये शौनकशिक्षायां कुत्रचिदपि नोल्लिख्यते ।
3. उभययोः पाणिनीयशिक्षा-शौनकशिक्षयोः कम्पस्वरस्य लक्षणं पृथक् पृथक् शब्दाडम्बरैः प्रदीयते । पाणिनीयशिक्षायां तु उदाहरणमाध्यमेन कम्पस्वरस्य लक्षणं सम्यग् ज्ञातुं प्रयतते ।

### सहायकग्रन्थ सूची


1. आचार्यः, रामनारायणः, अमरकोशः, भारतीयविद्याप्रकाशनम्, दिल्ली, वाराणसी, १९९९
2. ऋग्वेदः, (चतुर्भागात्मकः) कृष्णदास-एकाडेमी, वाराणसी, १९८३
3. भट्टः, श्रीमन्मोक्षमूलः, प्रो. वर्मा, वीरेन्द्रकुमारः च, ऋग्वेदभाष्यभूमिका, चौखम्वा ओरियेण्टाल, वाराणसी, १९८०
4. गिरिः, गोस्वामीप्रह्लादः, पाणिनीयशिक्षा, चौखम्बासंस्कृतसिरिज् अफिस् वाराणसी, अ.सं. २०१५
5. यजुर्वेदः, वैदिकशोधसंस्थानम्, होशियारपुरम्, १९४९
6. डा. दीक्षितः, शैलेन्द्रनाथः, शौनकशिक्षा, आचार्यगोपालचन्द्रमिश्रवैदिकउन्नयनसंस्थानम्, सी.के. ३२/१७, ब्रह्मनाल, वाराणसी, वि.सं.२०६७
7. आचार्यः, उदयनः, शिक्षाशास्त्रम्, (द्वितीयसंस्करणम्) रामलाल कपुरट्रष्ट रेवली, (सोनीपत्- हरियाणा) २०१६


---

[i] पाणिनीयशिक्षा.श्लो. ४२

[ii] द्र. या.शि. का. ४३ ।

[iii] द्र. जै.मी.सू. ९.२.३, शावरभाष्यम् ।

[iv] द्र. वा.स.प्रा.शा. १.४ उपरि उवटभाष्यम् ।

[v] द्र. मन्त्रोहीनः स्वरतो वर्णतो वा मिथ्याप्रयुक्तो न तमर्थमाह ।
स वाग्वज्रो यजमानं हिनस्ति यथेन्द्रशत्रुः स्वरतोऽपराधात् ।।
पा.शि.का. ५२।

[vi] द्र. स्व.अ.१.८ ।

[vii] द्र. निघण्टु २.४ ।

[viii] द्र. राजाराधाकान्तदवेन सम्पादितं प्रथमभागः, श.क.द्रु.पृ.४७५, तृ.सं.१९६७।

[ix] द्र. युधिष्ठिरमीमांसकद्वारा प्रणीतम्, वै.स्व.वो. पृ. ८ ।

[x] द्र. ता. ब्रा.७.१.१०, १७.१२.२, २४.११.६ ।

[xi] द्र. मे.को.९४ ।

[xii] द्र. गो.ब्रा. १.५.१४ ।

[xiii] द्र. तत्रैव १.५.१४ ।

[xiv] द्र. श.ब्रा. ३.७ ।

[xv] द्र. का.प्र.प. १.८ ।

[xvi] द्र. पा.शि. ११ ।

[xvii] उच्चैरुदात्तः (पा.१.२.२९)

[xviii] महाभाष्यम्- १.२०७

[xix] नीच्चैरनुदात्तः (पा.१.२.३०)
[xx] महाभाष्यम्- १.२०७
[xxi] द्र. ऋ.वे.१.१.५
[xxii] द्र. ऋ.वे. १.१.१ ।
[xxiii] द्र. पा.शि.का १२ ।
[xxiv] तत्रैव का.३०
[xxv] ऋग्वेद-५.८३.३
[xxvi] द्र. अनुदात्तो हृदि ज्ञेयो मूर्ध्नुदात्तः उदाहृतः ।
स्वरितः कर्णमूलीयः सर्वास्ये प्रचयः स्मृतः ।।पा.शि.का ४८ ।
[xxvii] द्र. तत्रैव का. ४६,४७ ।
[xxviii] द्र. शौ.शि. ५४ ।
[xxix] शौ.का.-५४
[xxx] तत्रैव
[xxxi] द्र. तत्रैव -५५ ।
[xxxii] द्र. शौ.शि. ५६,५७ ।
[xxxiii] द्र. तत्रैव ५८ ।
[xxxiv] तत्रैव